Roll No. ..................................

# DD–2528

## M. A. (Final) EXAMINATION, 2020

SANSKRIT

Paper Eighth

(साहित्यसिद्धान्त)

*Time : Three Hours*

*Maximum Marks : 100*

**सूचना :** सर्वे प्रश्नाः समाधेयाः।

**इकाई—I**

1. कयोश्चिद् **द्वयो**र्व्याख्या विधेया— 20

   (i) धर्मादिसाधनोपायः सुकुमारक्रमोदितः।
   काव्यबन्धोभिजातानां हृदया ादकारकः

   (ii) कविव्यापारवक्रत्वप्रकाराः संभवन्ति षट्।
   प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः

   (iii) सुकुमाराभिद्यः सोयं येन सत्कवयो गताः।
   मार्गेणोत्फुल्लकुसुमकाननेव षट्पदाः

   (iv) श्रुतिपेशलताशालि सुस्पर्शमिव चेतसा।
   स्वभावमसृणच्छायमाभिजात्यं प्रचक्षते



http://www.hyvonline.com

## इकाई—II

2. कयोश्चिद् **द्वयोः** कारिकयोः व्याख्या कार्या— 20

(i) काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौ चद्वन्द्ववियोगोत्थ शोकः श्लोकत्वमागतः

(ii) आलोकार्थी यथा दीपशिखायां यत्नवान् जनः।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः

(iii) तद्वत् सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम्।
बुद्धौ तत्त्वार्थदर्शिन्यां झटित्ये वावभासते

(iv) रूढा ये विषयेन्यत्र शब्दाः स्वविषयादपि।
लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः

## इकाई—III

3. किमपि **द्वयं** व्याख्यायताम्— 20

(i) द्वा सपुर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति

(ii) चत्वारिश्रृ ास्त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासोऽस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यानाविवेश

(iii) मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौ चमिथुनादेकमवधीः काममोहितम्

(iv) प्रसरति किमपि कथ चन नाभ्यस्ते गोचरे वचः कस्य।
इदमेव तत्कवित्वं यद्वाचः सर्वतोदिक्काः





## इकाई—IV

4. केषांचित् **चतुर्णां** व्याख्या विधेया— 20

(i) पदौचित्यम्।

(ii) अलंकारौचित्यम्।

(iii) कारकौचित्यम्।

(iv) वचनौचित्यम्।

(v) उपसर्गौचित्यम्।

(vi) कुलौचित्यम्।

(vii) विचारौचित्यम्।

## इकाई—V

5. रीतिसम्प्रदायस्य परिचयो देयः। 20

**अथवा**

वक्रोक्तिकारकस्य वक्रोक्तिविषयकं मतं निरूपयत।

**अथवा**

औचित्यसम्प्रदायस्य परिचयो देयः।



http://www.hyvonline.com